# .. brahmeshasheShAdikRitaM shrIrAdhAstotraM ..

## ॥ શ્રીરાધાસ્તોત્રં બ્રહ્મેશશેષાદિકૃતમ્ ॥

### Document Information

Text title : brahmeshasheShaadikRitaM shriiraadhaastotraM
File name : raadhaabrahmashesha.itx
Location : doc_deities_misc
Author : brahma, shiva, ananta
Language : Sanskrit
Subject : stotra
Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)
Proofread by : Daniel Mohanpersad (daneilmohanpersad98 at msn.com)
Source : brahmavaivartapuraaNa
Latest update : August 10, 2002
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીરાધાસ્તોત્રં બ્રહ્મેશશેષાદિકૃતમ્ ॥

॥ અથ બ્રહ્મેશશેષાદિકૃતમ્ શ્રીરાધાસ્તોત્રમ્ ॥

ષષ્ટિવર્ષસહસ્રાણિ દિવ્યાનિ પરમેશ્વરિ ।
પુષ્કરે ચ તપસ્તપ્તં પુણ્યક્ષેત્રે ચ ભારતે ॥ ૧ ॥

ત્વત્પાદપદ્મમધુરમધુલુબ્ધેન ચેતસા ।
મધુવ્રતેન લોભેન પ્રેરિતેન મયા સતિ ॥ ૨ ॥

તથાપિ ન મયા લબ્ધં ત્વદ્પાદપદમીપ્સિતમ્ ।
ન દૃષ્ટમપિ સ્વપ્નેઽપિ જાતા વાગશરીરિણી ॥ ૩ ॥

વારાહે ભારતે વર્ષે પુણ્યે વૃન્દાવને વને ।
સિદ્ધાશ્રમે ગણેશસ્ય પાદપદ્મં ચ દ્રક્ષ્યસિ ॥ ૪ ॥

રાધામાધવયોર્દાસ્યં કુતો વિષયિણસ્તવ ।
નિવર્તસ્વ મહાભાગ પરમેતત્ સુદુર્લભમ્ ॥ ૫ ॥

ઇતિ શ્રુત્વા નિવૃત્તોઽહં કુતો વિષયિણસ્તવ ।
નિવર્તસ્વ મહાભાગ પરમેતત્ સુદુર્લભમ્ ॥ ૬ ॥

શ્રીમહાદેવ ઉવાચ ।
પદ્મૈઃ પદ્માર્ચિતં પાદપદ્મં યસ્ય સુદુર્લભમ્ ।
ધ્યાયન્તે ધ્યાનનિષ્ટાશ્ચ શશ્વદ્ બ્રહ્માદયઃ સુરાઃ ॥ ૭ ॥

મુનયો મનવશ્ચૈવ સિદ્ધાઃ સન્તશ્ચ યોગિનઃ ।
દ્રષ્ટું નૈવ ક્ષમાઃ સ્વપ્ને ભવતી તસ્ય વક્ષસિ ॥ ૮ ॥

અનત ઉવાચ ।
વેદાશ્ચ વેદમાતા ચ પુરાણાનિ ચ સુવ્રતે ।
અહં સરસ્વતી સન્તઃ સ્તોતું નાલં ચ સન્તતમ્ ॥ ૯ ॥

અસ્માકં સ્તવને યસ્ય ભ્રભઙ્ગશ્ચ સુદુર્લભભઃ ।
તવૈવ ભર્ત્સને ભીતશ્ચાવયોરન્તરં હરિઃ ॥ ૧૦ ॥

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તે બ્રહ્મેશશેષાદિકૃતં
શ્રીરાધાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

.. brahmeshasheShAdikRitaM shrIrAdhAstotraM ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*